देवा यजमाना मनुष्याश्च वायुगोपाः वायुर्गोपा रक्षिता येषां ते[1] तादृशाः सन्तः श्रद्धां देवीम् उपासते प्रार्थयन्ते । हृदय्यया । हृदये भवा हृदय्या । तथाविधया आकूत्या संकल्परूपया क्रियया श्रद्धाम् एव परिचरन्ति सर्वे जनाः । कुत इत्यत आह । यतः कारणात् श्रद्धया हेतुभूतया वसु धनं विन्दते लभते श्रद्धावाञ्जनः । तत इत्यर्थः ॥

श्रद्धां प्रातर्हवामहे श्रद्धां मध्यंदिनं परि ।
श्रद्धां सूर्यस्य निम्रुचि श्रद्धे श्रद्धापयेह नः ॥ ५ ॥

श्रद्धाम् । प्रातः । हवामहे । श्रद्धाम् । मध्यंदिनम् । परि ।
श्रद्धाम् । सूर्यस्य । निऽम्रुचि । श्रद्धे । श्रत् । धापय । इह । नः ॥ ५ ॥

श्रद्धां देवीं प्रातः पूर्वाह्णे हवामहे[2] । तथा मध्यंदिनं परि । लक्षणे परेः कर्मप्रवचनीयत्वम् । मध्यंदिनं परिलक्ष्य । मध्यंदिन इत्यर्थः । मध्याह्नेऽपि तां श्रद्धाम् आह्वयामहे । सूर्यस्य सर्वस्य प्रेरकस्यादित्यस्य निम्रुचि अस्तमयवेलायां सायंसमयेऽपि तामेव श्रद्धाम् आह्वयामहे । ईदृग्रूपे हे श्रद्धे नः अस्मान् इह[3] लोके कर्मणि वा श्रद्धापय श्रद्धावतः कुरु ॥ ॥९॥ ॥११॥

द्वादशेऽनुवाके चत्वारिंशत्सूक्तानि । तत्र ' शास इत्था ' इति पञ्चर्चं प्रथमं सूक्तं भरद्वाजपुत्रस्य शासनाम्न आर्षमानुष्टुभमैन्द्रम् । अनुक्रान्तं च—' शासः शासो भारद्वाजः ' इति । युद्धाय संनद्धं राजानमनेनेक्षेत । तथा च सूत्रितम्—' अथैनमन्वीक्षेताप्रतिरथशाससौपर्णैः ' ( आश्व. गृ. ३. १२. १३ ) इति ॥

शास इत्था महाँ अस्यमित्रखादो अद्भुतः ।
न यस्य हन्यते सखा न जीयते कदा चन ॥ १ ॥

शासः । इत्था । महान् । असि । अमित्रऽखादः । अद्भुतः ।
न । यस्य । हन्यते । सखा । न । जीयते । कदा । चन ॥ १ ॥

शासः एतत्संज्ञोऽहम् इत्था इत्थमनेन वक्ष्यमाणप्रकारेणेन्द्रं स्तौमीति शेषः । हे इन्द्र त्वं महाँ असि सर्वेभ्योऽधिको भवसि । अमित्रखादः अमित्राणां शत्रूणां[4] खादिता विनाशयिता अत एव अद्भुतः आश्चर्यभूतश्च भवसि । यस्य इन्द्रस्य सखा मित्रभूतः पुरुषः कदा चन कदाचिदपि न हन्यते न हिंस्यते न जीयते न च शत्रुभिः पराजितो भवति स त्वं महाँ असीत्यन्वयः ॥

स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी ।
वृषेन्द्रः पुर एतु नः सोमपा अभयंकरः ॥ २ ॥

स्वस्तिऽदाः । विशः । पतिः । वृत्रऽहा । विऽमृधः । वशी ।
वृषा । इन्द्रः । पुरः । एतु । नः । सोमऽपाः । अभयम्ऽकरः ॥ २ ॥

---

१. ग-त-भ२.७.८-' ते ' नास्ति; भ१.४-ता । २. भ२-हवामहे आह्वयामहे । ३. ग-इहास्मिन् । ४. ग-शत्रूणां खादः ।

'श्रद्धया' इति पञ्चर्चं नवमं सूक्तमानुष्टुभं श्रद्धादेवताकम्। कामगोत्रजा श्रद्धा नामर्षिका। तथा चानुक्रान्तं—'श्रद्धया श्रद्धा कामायनी श्राद्धमानुष्टुभं तु' इति। लैङ्गिको विनियोगः॥

श्रद्धयाग्निः समिध्यते श्रद्धया हूयते हविः।
श्रद्धां भगस्य मूर्धनि वचसा वेदयामसि॥ १॥

श्रद्धया। अग्निः। सम्। इध्यते। श्रद्धया। हूयते। हविः।
श्रद्धाम्। भगस्य। मूर्धनि। वचसा। आ। वेदयामसि॥ १॥

पुरुषगतोऽभिलाषविशेषः श्रद्धा। तया श्रद्धया अग्निः गार्हपत्यादिः समिध्यते संदीप्यते। यदा हि[1] पुरुषे श्रद्धाभिगोचर आदरातिशयो जायते तदैव पुरुषोऽग्नीन् प्रज्वालयति नान्यदा। श्रद्धया एव हविः पुरोडाशादिहविश्च हूयते। आहवनीये प्रक्षिप्यते। यद्वा। अस्य सूक्तस्य द्रष्ट्या श्रद्धाख्ययाग्निः समिध्यते[2]। श्रद्धाम् उक्तलक्षणायाः श्रद्धाया अभिमानिदेवतां भगस्य भजनीयस्य धनस्य मूर्धनि प्रधानभूते स्थानेऽवस्थितां वचसा वचनेन स्तोत्रेण आ वेदयामसि अभितः प्रख्यापयामः। इदन्तो मसिः॥

प्रियं श्रद्धे ददतः प्रियं श्रद्धे दिदासतः।
प्रियं भोजेषु यज्वस्विदं म उदितं कृधि॥ २॥

प्रियम्। श्रद्धे। ददतः। प्रियम्। श्रद्धे। दिदासतः।
प्रियम्। भोजेषु। यज्वऽसु। इदम्। मे। उदितम्। कृधि॥ २॥

हे श्रद्धे ददतः चरुपुरोडाशादीनि प्रयच्छतो यजमानस्य प्रियम् अभीष्टफलं कुरु। दिदासतः दातुमिच्छतश्च हे श्रद्धे प्रियं कुरु। मे मम संबन्धिषु भोजेषु भोक्तृषु भोगार्थिषु यज्वसु कृतयज्ञेषु जनेषु च इदम् उदितम् उक्तं प्रियं कृधि कुरु॥

यथा देवा असुरेषु श्रद्धामुग्रेषु चक्रिरे।
एवं भोजेषु यज्वस्वस्माकमुदितं कृधि॥ ३॥

यथा। देवाः। असुरेषु। श्रद्धाम्। उग्रेषु। चक्रिरे।
एवम्। भोजेषु। यज्वऽसु। अस्माकम्। उदितम्। कृधि॥ ३॥

देवाः इन्द्रादयः असुरेषु उद्गूर्णबलेषु यथा श्रद्धां चक्रिरे अवश्यमिमे हन्तव्या इत्यादरातिशयं कृतवन्तः एवं श्रद्धावत्सु भोजेषु भोक्तृषु भोगार्थिषु यज्वसु यष्टृषु अस्माकम् अस्मत्संबन्धिषु तेषु उदितं तैरुक्तं प्रार्थितं फलजातं कृधि कुरु॥

श्रद्धां देवा यजमाना वायुगोपा उपासते।
श्रद्धां हृदय्य१याकूत्या श्रद्धया विन्दते वसु॥ ४॥

श्रद्धाम्। देवाः। यजमानाः। वायुऽगोपाः। उप। आसते।
श्रद्धाम्। हृदय्यया। आऽकूत्या। श्रद्धया। विन्दते। वसु॥ ४॥

---

१. त-भ१.२.४.८–च। २. ग–समिध्यते हविश्च हूयते।